इन्द्राग्निभ्यां क्रुञ्चान्, मित्राय मद्गून्, वरुणाय चक्रवाकान् २२ । अग्नये कुटरूनालभते, वनस्पतिभ्य उलूकान्, अग्नीषोमाभ्यां चाषान्, अश्विभ्यां मयूरान्, मित्रावरुणाभ्यां कपोतान् २३ । सोमाय लबानालभते, त्वष्ट्रे कौलीकान्, गोषादीर्देवानां पत्नीभ्यः, कुलीका देवजामिभ्यो, ऽग्नये गृहपतये पारुष्णान् २४ । अह्ने पारावतानालभते, रात्र्यै सीचापू, रहोरात्रयोः सन्धिभ्यो जतूः, मासेभ्यो दात्यौहान्, संवत्सराय महतः सुपर्णान् २५ । भूम्या आखूनालभते, ऽन्तरिक्षाय पाङ्क्त्रान्, दिवे कशान्, दिग्भ्यो नकुलान्, बभ्रुकानवान्तरदिशाभ्यः २६ । वसुभ्य ऋश्यानालभते, रुद्रेभ्यो रुरून्, आदित्येभ्यो न्यङ्कून्, विश्वेभ्यो देवेभ्यः पृषतान्, साध्येभ्यः कुलुङ्गान् २७ । ईशानाय परस्वत आलभते, मित्राय गौरान्, वरुणाय महिषान्, बृहस्पतये गवयां, त्वष्ट्र उष्ट्रान् २८ । प्रजापतये पुरुषान् हस्तिन आलभते, वाचे प्लुषीं, चक्षुषे मशकान्, श्रोत्राय भृङ्गाः, २९ । प्रजापतये च वायवे च गोमृगो, वरुणायारण्योमेषो, यमाय कृष्णो, मनुष्यराजाय मर्कटः, शार्दूलाय रोहित्, ऋषभाय गवयी, क्षिप्रश्येनाय वर्त्तिका, नीलङ्गोः कृमिः, समुद्राय शिशुमारो, हिमवते हस्ती ३० । मयुः प्राजापत्य, उलो हलिक्ष्णो वृषदंशस्ते धात्रे, दिशां कङ्को, धुङ्क्षाग्नेयी कलविङ्को लोहिताहिः पुष्करसादस्ते त्वाष्ट्रा, वाचे क्रुञ्चः ३१ । सोमाय कुलुङ्ग, आरण्योऽजो नकुलः शका ते पौष्णाः, क्रोष्टा मायो, रिन्द्रस्य गौरमृगः, पिद्वोन्यङ्कुः कक्कटः, स्तेऽनुमत्यै, प्रतिश्रुत्कायै चक्रवाकः ३२ । सौरी बलाका, शार्गः सृजयः शयाण्डकस्ते मैत्राः, सरस्वत्यै, शारिः पुरुषवाक्, श्वाविद्भौमी, शार्दूलो वृकः पृदाकुस्ते मन्यवे, सरस्वते शुकः पुरुषवाक् ३३ । सुपर्णः पार्जन्य, आतिर्वाहसो दर्विदा ते वायवे, बृहस्पतये वाचस्पतये, पैङ्गराजो, ऽलज आन्तरिक्षः, प्लवो मद्गुर्मत्स्यस्ते नदीपतये, द्यावापृथिवीयः कूर्मः ३४ । पुरुषमृगश्चन्द्रमसो, गोधा कालका दार्वाघाटस्ते वनस्पतीनां, कृकवाकुः सावित्रो, हंसो वातस्य, नाक्रो मकरः कुलीपयस्ते ऽकूपारस्य, ह्रियै शल्लकः ३५ । एण्यह्नो, मण्डूको मूषिका तित्तिरिस्ते सर्पाणां, लोपाश आश्विनः । कृष्णो रात्र्या, ऋक्षो जतूः सुषिलीका तइतरजनानां, जहका वैष्णवी ३६ । अन्यवापोऽर्धमासानामृश्यो मयूरः सुपर्णस्ते गन्धर्वाणा, मपामुद्रो मासां, कश्यपो रोहित् कुण्डृणाची गोलत्तिका तेऽप्सरसां, मृत्यवेऽसितः ३७ । वर्षाहूर्ऋतूना, माखुः कशो मान्यालस्ते पितृणां, बलायाजगरो, वसूनां कपिञ्जलः, कपोत उलूकः शशस्ते निर्ऋत्यै, वरुणायारण्यो मेषः ३८ । श्वित्र आदित्याना, मुष्ट्रो घृणीवान् वार्ध्रीनसस्ते मत्या, अरण्याय सृमरो, रुरु रौद्रः, क्वयिः कुटरुर्दात्यौहस्ते वाजिनां, कामाय पिकः ३९ । खड्गो वैश्वदेवः, श्वा कृष्णः कर्णो गर्दभस्तरक्षुस्ते रक्षसा, मिन्द्राय सूकरः । सिंहो मारुतः, कृकलासः पिप्पका शकुनिस्ते शरव्यायै विश्वेषां देवानां पृषतः । ४० । एवं षट्त्र्यधिकं शतद्वयमारण्याः पशव उक्ताः । मध्यमयूपे द्वौ एकादशिनौ अन्येषु एकैके एकादशिनः इति एकविंशतियूपेषु द्वाविंशतिरेकादशिनः । अतः सप्तविंशत्यधिकशतत्रयम् अश्वादि सौर्यान्तं द्वाविंशत्या सह मिलितां सत् ऊनपञ्चाशदधिकं शतत्रयम् । ताः ग्राम्यापशवः आरण्यास्तु २६० मिलिताः ६०९ पशवोऽश्वमेधे विहिताः तदुक्तं श्लोके । "षट् शतानि नियुज्यन्ते पशूनां मध्यमेऽहनि । अश्वमेधस्य यज्ञस्य नवभिश्चाधिकानि च" । तेषु ग्राम्या आलभ्या आरण्या बन्धनान्मोच्या न तु हिंस्या इति । एवञ्चात्राश्वस्य प्रधान्यात् अश्वमेधत्वम् । अश्वलक्षणं तु" कालाम्भोधरसङ्काशः स्वर्णवर्णमुखोबली । यस्य पार्श्वावुभावर्द्धचन्द्राकारौ सुशोभनौ । पुच्छं विद्युत्प्रतीकाशमुदरं कुन्दसन्निभम् । पादाश्चैव हरिद्वर्णाः कर्णौ सिन्दूरसन्निभौ । ज्वलदग्निनिभा जिह्वा चक्षुषी भास्करोपमे, विराजितो रोमराज्या सानुलोमविलोमया । विचित्रैर्विविधैर्वर्णैश्चित्रोरजतविन्दुभिः । यो वेगे वायुतुल्यः स्यादुच्चैरुच्चैःश्रवायथा । यस्य गात्रोद्भवोगन्धो गन्धर्व्वमपि मोहयेत् । एवं लक्षणसंयुक्तो यज्ञियः पशुरुच्यते" वाशि०रा० । "गोक्षीरसमवर्णञ्च कुन्देन्दुहिमसन्निभम् । पीतपुच्छं श्यामकर्णं सर्वतोगतिमत्तमम् । श्यामं वापि महीपाल । यज्ञेऽश्वंस्तुरगं विदुरिति" पुरा० । शत०ब्राह्मणे तु "द्विरूपएवैषोऽश्वः स्यात् कृष्णसारङ्गः प्रजापतेर्वा एषोऽक्ष्णः समभवत् द्विरूपं वा इदं चक्षुः शुक्लं चैव कृष्णं च तदेनं स्वेन रूपेण समर्धयतीति । अथ होवाच सात्ययज्ञिः त्रिरूप एवैषोऽश्वः स्यात्तस्य कृष्णः पूर्वार्धः शुक्लोऽपरार्धः कृत्तिकाञ्जिः पुरस्तात्तद्यत् कृष्णः पूर्वार्धो भवति यदेवेदं कृष्णमक्ष्णस्तदस्य तदथ यच्छुक्लोऽपरार्धो भवति यदेवेदं शुक्लमक्ष्ण स्तदस्य तदथ यत्कृत्तिकाञ्जिः पुरस्तात्सा कनीनिका स एवं रूपसमृद्धोऽतो यतमोऽस्योपकल्पेत बहुरूपो वा द्विरूपो वा त्रिरूपो वा कृत्तिकाञ्जिस्तमालभेत जवेन त्वेव समृद्धः स्यात्" । "कृत्तिकाकारं कृत्तिकान्तिकरोहिणीशकटा